य आस्ते यश्च चरति यश्च पश्यति नो जनः ।
तेषां सं हन्मो अक्षाणि यथेदं हर्म्यं तथा ॥ ६ ॥

यः । आस्ते । यः । च । चरति । यः । च । पश्यति । नः । जनः ।
तेषाम् । सम् । हन्मः । अक्षाणि । यथा । इदम् । हर्म्यम् । तथा ॥ ६ ॥

**वेङ्कट०** तेषाम्[1] सर्वेषाम् अक्षाणि सम् हन्मः । संहननं[2] सर्वेषां हिंसनं दण्डादिना मथनम् । तथा कृते यथा इदम् हर्म्यम् 'अविचलत् तिष्ठति' तथा[3] सर्वः जनः अविचलन्तिष्ठतु[3] सुप्तः ॥ ६ ॥

सहस्रशृङ्गो वृषभो यः समुद्रादुदाचरत् ।
तेना सहस्येना वयं नि जनान्त्स्वापयामसि ॥ ७ ॥

सहस्रऽशृङ्गः । वृषभः । यः । समुद्रात् । उत्ऽआचरत् ।
तेन । सहस्येन । वयम् । नि । जनान् । स्वापयामसि ॥ ७ ॥

**वेङ्कट०** सहस्रतेजाः वर्षिता यः अयम् समुद्रात् उत्तिष्ठति तेन अभिभवनकुशलेन नि स्वापयामः वयम् इमान् जनान्[4] इति ॥ ७ ॥

प्रोष्ठेशया वह्येशया नारीर्यास्तल्पशीवरीः ।
स्त्रियो याः पुण्यगन्धास्ताः सर्वाः स्वापयामसि ॥ ८ ॥

प्रोष्ठेऽशयाः । वह्येऽशयाः । नारीः । याः । तल्पऽशीवरीः ।
स्त्रियः । याः । पुण्यऽगन्धाः । ताः । सर्वाः । स्वापयामसि ॥ ८ ॥

**वेङ्कट०** खट्वाशयाः वह्येशयाः[6] । वह्यं शिविकादि । याः च नार्यः तल्पशायिन्यः, स्त्रियः याः च पुण्यगन्धाः, ताः सर्वाः प्रस्वापयामः ॥ ८ ॥

'इति पञ्चमाष्टके चतुर्थाध्याये द्वाविंशो वर्गः' ॥

[ ५६ ]

'वसिष्ठो मैत्रावरुणिर्ऋषिः । मरुतो देवता । त्रिष्टुप् छन्दः, आद्या एकादश द्विपदा विराजः' ।

क ईं व्यक्ता नरः सनीळा रुद्रस्य मर्या अधा स्वश्वाः ॥ १ ॥

के । ईम् । विऽअक्ताः । नरः । सऽनीळाः । रुद्रस्य । मर्याः । अध । सुऽअश्वाः ॥ १ ॥

**वेङ्कट०** के इमे व्यक्ताः भवन्ति मनुष्याः सरथाः रुद्रस्य पुत्राः अपि च स्वश्वाः इति मरुतो दृष्ट्वा विस्मितो वदति ॥ १ ॥

---

१. एषां वि² अ¹; येषां लभ. २. सहन° ल लभ. ३-३. अविचलतिष्ठतु इति वि² अ¹. ४. यथा वि¹ अ¹. ५. चलंस्ति° वि² अ¹. ६. नास्ति अ¹ वि². ७. नास्ति वि². ८-८. नास्ति मूको.

'समिद्धो अग्निर्दिवी(वि[1] इ)ति विश्ववारार्थमुच्यते ।
तस्याः पतिर्गौरिवीतिरपश्यत् सूक्तमुत्तरम् ॥ ११ ॥

'सत्रासुत्यम्[2]' इति सूते विश्ववारा ततो वयम् ।
मन्यामहे पतिं तस्या गौरिवीतिमिहागतम् ॥ १२ ॥

मध्येऽत्रीणामाङ्गिरसो धरुणो नाम कश्चन ।
सूक्तं 'प्र वेधसे[3]' इति प्रसङ्गाद् दृष्टवानृषिः ॥ १३ ॥

तेनाभिपज्यत[4] सूक्तेन धरुणोऽत्रिमृषिं पुरा ।
तथैव तत्रात्रिम् 'अस्पर्[5]' इति सूक्तान्तरः[6] श्रुतम् ॥ १४ ॥

वर्तमाना मातृकुले तत्रस्थैर्ऋषिभिः सह ।
तादृशान्[7] ददृशुर्मन्त्रान् इति केचिद्व्यवस्थिताः ॥ १५ ॥

समानोदकसामान्याच्छ्यावाश्वः[8] कण्वमण्डले ।
अग्निनेन्द्रेण[9] सूक्तानि ददर्श पुनरागतः ॥ १६ ॥

ऊह्यानि[10] कारणान्येवं मण्डलान्तरसङ्क्रमे ।
अन्येषामपि दृष्टानामिति वृद्धेभ्य आगमः ॥ १७ ॥

ऋषयो बह्वृचैरित्थं स्मर्यन्ते सामगैरपि[11] ।
स्मरन्त्यध्वर्यवः[12] नैवं[13] तत्र किं कारणं भवेत्[14] ॥ १८ ॥

प्रजापतिश्च सोमश्च तृतीयोऽग्निस्तथैव च ।
विश्वेदेवाः स्वयम्भूश्च तेषां काण्डर्षयो मताः[15] ॥ १९ ॥

यजूंष्यृचश्च[16] बहुभिः दृष्टा ह्येतैर्महर्षिभिः[17] ।
काण्डान्यकुर्वन्नृषयः स्मर्यन्तेऽध्वर्युभिश्च ते ॥ २० ॥

पठन्त्यथान्तरानादौ ब्राह्मणानां कठाः[18] पुनः ।
ऋषीन् व्याख्यानभूतानाम् अनेकान् यजुषामपि ॥ २१ ॥

---

१. ऋ ५,२८,१. २. ऋ ५,२८,३. ३. ऋ ५,१५,१. ४. अभिपज्य वि[2] अ[1] क लम. ५. ऋ ५,१५,५. ६. सूक्तं तथा वि[2] अ[1]; सूक्तं तता लम. ७. °शा वि[2] अ[1] क लम. ८. °दर्क° वि[2] अ[1]. ९. ऋ ८,३५,१. १०. ओह्या° वि[2] अ[1]. ११. सागमै° वि[2] अ[1]; सागमे° लम. १२. °रन्त्वाध्वर्यवः वेंकम; °रन्त्यध्वर्यवे वि[2] अ[1] क; °रन्तर्यवे लम. १३. नैव वि[2] अ[1]. १४. वदेत् वेंकम. १५. विदुः वेंकम. १६. यजुष्यृ° वि[2] अ[1] वेंकम क; यजूंष्यृ च लम. १७. नैते म° वि[2] अ[1] लम; सन्ति म° वेंकम. १८. कथाः वि[2] अ[1] क लम.

तमर्केभिस्तं सामभिस्तं गायत्रैश्चर्षणयः । इन्द्रं वर्धन्ति क्षितयः ॥ ९ ॥

तम् । अर्केभिः । तम् । सामऽभिः । तम् । गायत्रैः । चर्षणयः । इन्द्रम् । वर्धन्ति । क्षितयः ॥ ९ ॥

**वेङ्कट॰** तम् ऋग्भिः, तम् सामभिः, तम् गायत्रैः च इन्द्रम् विशेषेण वर्धयन्ति चर्षणयः क्षितयः द्रष्टारो मनुष्या इति ऋषीनाहुः ॥ ९ ॥

प्रणेतारं वस्यो अच्छा कर्तारं ज्योतिः समत्सु । सासह्वांसं युधामित्रान् ॥ १० ॥

प्रऽनेतारम् । वस्यः । अच्छ । कर्तारम् । ज्योतिः । समत्ऽसु । ससह्वांसम् । युधा । अमित्रान् ॥ १० ॥

**वेङ्कट॰** प्रणेतारम् अभ्युदयम् प्रति कर्तारम् अन्धकारापनयनेन ज्योतिः, सङ्ग्रामेषु अभिभवन्तम्[1] युद्धेन अमित्रान् ॥ १० ॥

स नः पप्रिः पारयाति स्वस्ति नावा पुरुहूतः । इन्द्रो विश्वा अति द्विषः ॥ ११ ॥

सः । नः । पप्रिः । पारयाति । स्वस्ति । नावा । पुरुऽहूतः । इन्द्रः । विश्वाः । अति । द्विषः ॥ ११ ॥

**वेङ्कट॰** सः अस्मान् तर्पयिता[2] पारं[3] नयतु अविनाशेन नावा बहुभिराहूतः । इन्द्रः विश्वाः च द्विषः अति पारयत्वस्मानिति । '[4]यस्मात्तथैवं सिद्धम्[4]' अतिपारय तस्मात् शत्रूनिति ॥ ११ ॥

स त्वं न इन्द्र वाजेभिर्दशस्या च गातुया च । अच्छा च नः सुम्नं नेषि ॥ १२ ॥

सः । त्वम् । नः । इन्द्र । वाजेभिः । दशस्य । च । गातुऽय । च । अच्छ । च । नः । सुम्नम् । नेषि ॥

**वेङ्कट॰** सः त्वम् अस्मभ्यम् इन्द्र ! बलैः शत्रुधनं प्रयच्छ च गमय च धनं प्रति । अभि नेषि च अस्मान् सुखम् ॥ १२ ॥

'[5]इति षष्ठाष्टके प्रथमाध्याये एकविंशो वर्गः[5]' ॥

[ १७ ]

[5]इरिम्बिठिः काण्व ऋषिः । इन्द्रो देवता । गायत्री छन्दः, अन्त्ययोः प्रगाथः ( =चतुर्दशी बृहती, पञ्चदशी सतोबृहती )[5] ।

आ याहि सुषुमा हि त इन्द्र सोमं पिबा इमम् । एदं बर्हिः सदो मम ॥ १ ॥

आ । याहि । सुसुम । हि । ते । इन्द्र । सोमम् । पिब । इमम् । आ । इदम् । बर्हिः । सदः । मम ॥ १ ॥

**वेङ्कट॰** आ याहि । '[6]सुषुम ते हि[6]' सोमम् इन्द्र! । पिब सोमम् इमम्[7] । आ सीद[8] '[9]च इदम्[9]' मदीयम् बर्हिः ॥ १ ॥

---

१. °वन्तु वि[२]; °वन्त अ[१]. २. विश्वा मूको. ३. परायन् मूको. ४-४. यथा तवेम सिद्धाम वि[२]; यथा तवेन सिद्धाम् अ[१]. ५-५. नास्ति मूको. ६-६. सुष्ठु ते महिमा मूको. ७. इव मूको. ८. नास्ति मूको. ९-९. वेदं वि[२]; वेदं वा अ[१].

**वेङ्कट०** भद्रम् मनः कुरु सङ्ग्रामे, येन मनसा त्वम् अभिभवसि सङ्ग्रामेषु शत्रून्। अव तनुहि स्थिराणि धनूंषि बहूनि हिंसताम्। वयं शत्रून् हनाम[1] [2]तव अभ्येषणैः[2] ॥ २० ॥

[3]इति षष्ठाष्टके प्रथमाध्याये द्वात्रिंशो वर्गः[3] ॥

ई॒ळे गि॒रा मनु॑र्हितं॒ यं दे॒वा दू॒तम॑र॒तिं न्ये॒रि॒रे । यजि॑ष्ठं हव्य॒वाह॑नम् ॥ २१ ॥

ई॒ळे । गि॒रा । मनुः॑ऽहितम् । यम् । दे॒वाः । दू॒तम् । अ॒र॒तिम् । नि॒ऽए॒रि॒रे । यजि॑ष्ठम् । ह॒व्य॒ऽवाह॑नम् ॥ २१ ॥

**वेङ्कट०** स्तौमि स्तुत्या मनुना हितम्, यम् देवाः दूतम् गन्तारम् भूम्यां प्रापयन् यष्टृतमम् हविषो वोढारम् ॥ २१ ॥

ति॒ग्मज॑म्भाय॒ तरु॑णाय॒ राज॑ते॒ प्रयो॑ गायस्य॒ग्नये॑ ।
यः पि॒शते॑ सू॒नृता॑भिः सु॒वीर्य॑म॒ग्निर्घृ॒तेभि॒राहु॑तः ॥ २२ ॥

ति॒ग्मऽज॑म्भाय । तरु॑णाय । राज॑ते । प्रयः॑ । गा॒य॒सि॒ । अ॒ग्नये॑ ।
यः । पि॒शते॑ । सू॒नृता॑भिः । सु॒ऽवीर्य॑म् । अ॒ग्निः । घृ॒तेभिः॑ । आऽहु॑तः ॥ २२ ॥

**वेङ्कट०** तिग्मदंष्ट्राय यूने राजते अन्नम् वदसि अग्नये, यः आश्लेषयति[4] वाग्भिः सुवीर्यम् स्तोतारम् अग्निः घृतैश्च आहुतः[5] ॥ २२ ॥

यदी॑ घृ॒तेभि॒राहु॑तो॒ वाशी॑म॒ग्निर्भर॑त॒ उच्चाव॑ च । असु॑र इव नि॒र्णिज॑म् ॥ २३ ॥

यदि॑ । घृ॒तेभिः॑ । आऽहु॑तः । वाशी॑म् । अ॒ग्निः । भर॑ते । उत् । च॒ । अव॑ । च॒ ।
असु॑रःऽइव । निः॒ऽनिज॑म् ॥ २३ ॥

**वेङ्कट०** यदि अग्निः घृतैः आहुतः, ज्वालाम् अग्निः वहति उच्चैः नीचैः च। 'वाशी' ( निघ १,११ ) इति वाङ्नाम[6]। वाशतिरुच्चारतिकर्मा,[7] इह[8] तु ज्वालामाह। यथा बलवान् कवचम् बिभर्ति, [9]तथा बिभर्ति[9] इति ॥ २३ ॥

यो ह॒व्यान्यैर॑यता॒ मनु॑र्हितो दे॒व आ॒सा सु॑ग॒न्धिना॑ ।
विवा॑सते॒ वार्या॑णि स्वध्व॒रो होता॑ दे॒वो अम॑र्त्यः ॥ २४ ॥

यः । ह॒व्यानि॑ । ऐर॑यत । मनुः॑ऽहितः । दे॒वः । आ॒सा । सु॒ऽग॒न्धिना॑ ।
विवा॑सते । वार्या॑णि । सु॒ऽअ॒ध्व॒रः । होता॑ । दे॒वः । अम॑र्त्यः ॥ २४ ॥

**वेङ्कट०** यः हवींषि प्रेरितवान् मनुना निहितः[10] देवः आस्येन शोभनगन्धेन, स निर्गमयति धनानि सुयज्ञः होता देवः अमर्त्यः ॥ २४ ॥

---

१. भद्र॰ मूको. २-२. तव ह्वरणैः वि[२]; तवां ह्वरणे अ[१]. ३-३. नास्ति मूको. ४. आशोषयति मूको. ५. आहुतयः मूको. ६. चोन्दना मूको. ७. वाशतेरुच्चारतिकर्मो वि[२]; वाशतेरुच्चारतिकर्मो ··· अ[१]. ८. इ मूको. ९-९. तदानीं बिभ्रत वि[१]; तदानीं बिभ्रत मूको. १०. ॰हितः स मूको.

वेङ्कट० अस्य गृहं स्वर्णं भवति। अहरहः धेनुमती इळा दुग्धे। धेनुः पयः धिनोति इति। यद्वा इळा गवां देवता, सा धेनुभिः धेनुमती भवति ॥ ४ ॥

या दंपती समनसा सुनुत आ च धावतः। देवासो नित्ययाशिरा ॥ ५ ॥

या। दंपती इति दम्ऽपती। सऽमनसा। सुनुतः। आ। च। धावतः।
देवासः। नित्यया। आऽशिरा ॥ ५ ॥

वेङ्कट० शौनकः— 'यजमानयोरेव दम्पत्योः पञ्च या दम्पती ऋचः' ॥ ( बृदे ६,७४ ) ॥

यौ दम्पती सुमनसौ सोमम् सुनुतः, आ च धावतः सोमं शोधयतः हे देवाः! नित्येन आशिरेण। उत्तरत्र सम्बन्धः ॥ ५ ॥

'इति षष्ठाष्टके द्वितीयाध्याये अष्टाविंशो वर्गः' ॥

प्रति प्राशव्याँ इतः सम्यञ्चा बर्हिराशाते। न ता वाजेषु वायतः ॥ ६ ॥

प्रति। प्राशव्यान्। इतः। सम्यञ्चा। बर्हिः। आशाते इति। न। ता। वाजेषु। वायतः ॥ ६ ॥

वेङ्कट० प्रति गच्छतः[2] प्राश्यान्[3] नवाशादीन्[4]। सम्यञ्चौ च यज्ञम् व्याप्नुतः। न तौ शुष्यतः अन्नेषु ॥ ६ ॥

न देवानामपि ह्नुतः सुमतिं न जुगुक्षतः। श्रवो बृहद् विवासतः ॥ ७ ॥

न। देवानाम्। अपि। ह्नुतः। सुऽमतिम्। न। जुगुक्षतः। श्रवः। बृहत्। विवासतः ॥ ७ ॥

वेङ्कट० न देवानाम् अपि ह्नुतः[5]। अपिह्नवः[6] निह्नवः। तदेवाऽऽह—सुमतिम् न जुगुक्षतः न संवृणुतः। बृहत् अन्नम् देवेभ्यः प्रयच्छतः[7]। देवैः दत्तं प्रकाशयन्तौ 'पुनःपुनः यजतः[8]' ॥ ७ ॥

पुत्रिणा ता कुमारिणा विश्वमायुर्व्यश्नुतः। उभा हिरण्यपेशसा ॥ ८ ॥

पुत्रिणा। ता। कुमारिणा। विश्वम्। आयुः। वि। अश्नुतः। उभा। हिरण्यऽपेशसा ॥ ८ ॥

वेङ्कट० पुत्रवन्तौ तत्रापि कुमारवन्तौ विश्वम् आयुः प्राप्नुतः, उभौ हिरण्यरूपैः[9] आभरणैः अलङ्कृताविति ॥ ८ ॥

वीतिहोत्रा कृतद्वसू दशस्यन्तामृताय कम्।
समूधो रोमशं हतो देवेषु कृणुतो दुवः ॥ ९ ॥

---

१-१. नास्ति मूको. २. °च्छतम् मूको. ३. तु. वैप १,२२४० i; प्राश्यानम् मूको. ४. नवाशा° मूको. ५. ह्रुतः मूको. ६. °पिह्नवि वि°; °पि ह्नवः अ°. ७. °च्छथः अ°. ८-८. यजत पुनः पुनः अ°. ९. °रूपौ मूको.

इमानि त्रीणि विष्टपा तानीन्द्र वि रोहय । शिरस्ततस्योर्वरामादिदं म उपोदरे ॥ ५ ॥

इमानि । त्रीणि । विष्टपा । तानि । इन्द्र । वि । रोहय ।
शिरः । ततस्य । उर्वराम् । आत् । इदम् । मे । उप । उदरे ॥ ५ ॥

वेङ्कट० इमानि त्रीणि स्थानानि तानि त्वम् इन्द्र ! वि रोहय । शिरः ततस्य मम पितुः । तथा उर्वराम् पितुः क्षेत्रम् । ततः यत् इदम् [1]मे उप उदरे इति[1] गुह्यं निर्दिशति । तद्धि त्वग्दोषे[2] सति असञ्जातरोमकं भवतीति । शाट्यायनकम् — 'तामब्रवीत् — अपाले किंकामासीति । साऽब्रवीत् — 'इमानि त्रीणि विष्टपा'' इति । खलतिर्हाऽस्य[3] पितास । तं हाऽखल्तिं चकार । उर्वरा हाऽस्य न जज्ञे । सो ह जज्ञे[4] । उपस्थे हाऽस्यै रोमाणि नासुः । तान्यु ह जज्ञिरे'' (तु. जैमि १,२२१) इति । अस्योत्तरा भूयसे निर्वचनाय — 'असौ च या नः' इति ॥ ५ ॥

असौ च या न उर्वरादिमां तन्वं मम ।
अथो ततस्य यच्छिरः सर्वा ता रोमशा कृधि ॥ ६ ॥

असौ । च । या । नः । उर्वरा । आत् । इमाम् । तन्वम् । मम ।
अथो इति । ततस्य । यत् । शिरः । सर्वा । ता । रोमशा । कृधि ॥ ६ ॥

वेङ्कट० निगदव्याख्याता ॥ ६ ॥

खे रथस्य खेऽनसः खे युगस्य शतक्रतो । अपालामिन्द्र त्रिष्पूत्व्यकृणोः सूर्यत्वचम् ॥७॥

खे । रथस्य । खे । अनसः । खे । युगस्य । शतक्रतो इति शतऽक्रतो ।
अपालाम् । इन्द्र । त्रिः । पूत्वी । अकृणोः । सूर्यऽत्वचम् ॥ ७ ॥

वेङ्कट० शाट्यायनकम् — ''तां[5] खे रथस्यात्यबृहत् । सा गोधाऽभवत्[6] । तां खेऽनसोऽत्यबृहत् । सा कृकलास्यभवत् । तां खे युगस्याऽत्यबृहत् । सा संश्लिष्टिकाऽभवत्[8] । तद् एषाऽभ्यनूच्यते[9] — 'खे रथस्य खेऽनसः'' इति । तस्यै ह यत्[10] कल्याणतमं रूपाणां तद्बभूवास' (तु. जैमि १,२२१) इति । त्वग्दोषापनयनाय[11] अक्षादिद्वारेष्वतिकर्षणमिति ॥ ७ ॥

[12]इति षष्ठाष्टके षष्ठाध्याये चतुर्दशो वर्गः[12] ॥

## [९२]

[1]श्रुतकक्षः सुकक्षो वा आङ्गिरस ऋषिः । इन्द्रः देवता । गायत्री छन्दः, प्रथमानुष्टुप्[1] ।

पान्तमा वो अन्धस इन्द्रमभि प्र गायत । विश्वासाहं शतक्रतुं मंहिष्ठं चर्षणीनाम् ॥१॥

---

१-१. मुखोपो शति अ[1]; मुखोदर शति वि[1]. २. त्वं दो° मूको. ३. खल° मूको. ४. न ज° मूको. ५. नशत मूको. ६. नास्ति मूको. ७. °भव मूको. ८. संशिष्टिका° मूको. ९. °भ्यनू° मूको. १०. तत् मूको. ११. त्वग्द° मूको. १२-१२. नास्ति मूको.

